# ॥ सनातनदेवीसूक्त ॥

या परमेश्वरी सर्वभूतानां या च देवे व्यवस्थिता ।
चण्डिकारुपेण सा देवि मम पापं व्यपोहतु ॥१॥
नमो देवै महादेवै शिवायै सततं नम: ।
नम: प्रकृत्यै भद्रायै नियता: प्रणता: स्म ताम् ॥२॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नम: ॥३॥
अतिसौम्या अतिरौद्रायै नतास्तस्यै नमो नम: ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नम: ॥४॥
या देवी सर्वभूतेषु विष्णुमात्रेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम: ॥५॥
या देवी सर्वभूतेषु चेतनेति अभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम: ॥६॥
या देवी सर्वभूतेषु परावाणीरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम: ॥७॥
या देवी सर्वभूतेषु निद्रारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम: ॥८॥
या देवी सर्वभूतेषु क्षुधारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम: ॥९॥
या देवी सर्वभूतेषु तृष्णारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम: ॥१०॥
या देवी सर्वभूतेषु क्षान्तिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम: ॥११॥
या देवी सर्वभूतेषु जातिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम: ॥१२॥
या देवी सर्वभूतेषु शान्तिरुपेण संस्थिता ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥
या देवी सर्वभूतेषु ईशस्मृतिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥
या देवी सर्वभूतेषु दयारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५॥
या देवी सर्वभूतेषु तुष्टिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु तृप्तिरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥
या देवी सर्वभूतेषु तपश्चर्यारुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥
या देवी सर्वभूतेषु मातृरुपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥
वागादि अगम्या महती त्रिपुरा सर्वकारणम् ।
तस्या यत् परमं रुपं सर्वाऽन्तरतया स्थितम् ॥२०॥
योगिश्रेष्ठा विजानन्ति बहिर्देशे नेतरे ।
तस्या यत् अपरं रुपं स्थूलं तत् सर्वगोचरम् ॥२१॥
सा स्थूलरुपा अष्टादशभुजा सुरम्या सिंहसंस्थाना ।
ईहाशून्या अर्चितपदा स्वर्णवर्णा एधमाना ॥२२॥
अनुत्तरा अनघा अनन्ता अद्भुतरुपा ।
अतिलोकचरित्रा राका अतिशुभ्रप्रदा ॥२३॥
सकलचराचरवपुराद्या त्वं स्वाऽऽश्रितलोका लोकगणा ।
नाऽन्यत्किञ्चित्तव शरणं स्वं विभवं श्रित्वा ननु भासि ॥२४॥
देवि प्रपन्नार्तिहरे प्रसीद,प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥२५॥